**A** **811**

# SAMAGRA SHIKSHA, KERALA
## Annual Evaluation - 2019-20

First Language Part I- Paper-I

**SANSKRIT**

(For Academic and Sanskrit Schools)

exam WiNNER®

**Class- VIII**

Time -1½ Hours | Total Score - 40

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः । प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

**1. अधोदत्तानां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।** 4x1=4

**क)** सर्वेषाम् आसनानाम् अन्ते अनुष्ठेयम् आसनं किम्?
(धनुरासनम् , शवासनम् ,पद्मासनम् ,वज्रासनम् )

**ख)** सर्वद्रव्येषु अनुत्तमं द्रव्यं किम्?
(धनम् , क्षमा , धैर्यम् , विद्या )

**ग)** प्रथमतया अनन्तपुरे क्रिक्कट्क्लब् कः स्थापितवान्?
(मार्ताण्डवर्मा , शक्तन् तम्पुरान् ,केरलवर्मा , स्वातितिरुनाल्)

**घ)** अल्पज्ञः सर्वज्ञभावं प्रकटयति। अत्र कः न्यायः प्रवर्तते ?
(कूपमण्डूकन्यायः , अरण्यरोदनन्यायः ,स्थालीपुलाकन्यायः ,अन्धपङ्गुन्यायः)

**2. यथोचितं योजयत।** 4x1=4

| | | | |
|---|---|---|---|
| **क)** | दिलीपः | - | अष्टवैद्यः। |
| **ख)** | वह्निः | - | सूर्यवंशः । |
| **ग)** | मणिप्रवालम् | - | पावकः। |
| **घ)** | आलत्तियूर् नम्पि | - | मयूरसन्देशः। |

**3. उदाहरणानुसारं सन्धिच्छेदं लिखत।** 1x1=1

**उदा-** महाभागोऽयम् - महाभागः + अयम्

**क)** ग्रन्थोऽयम् - ......... + ........

**4. उदाहरणानुसारं एकपदं लिखत।** 1x1=1

**उदा-** आनन्देन सह वर्तते - सानन्दम्।

**क)** आमोदेन सह वर्तते - ................................................।



exam WiNNER®

**5. अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत।** 1x1=1

जानकीजाने ! मोक्षकवाटं नाहं जाने ।

**6-10 अधोदत्तेभ्यः प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत ।** 4x2=8

**6. कोष्ठकात् भूतकालक्रियापदं चित्वा वाक्यं पूरयत ?**

क) गृहस्य परिसरे काचित् वापी ...........।(आसीत् / अस्ति )

ख) आचार्यः छात्रान् गुणपाठकथाम् ................।(वदति / अवदत्)

**7. शाकानां फलानां च पट्टिकां रचयत।**

दाडिमम् , वृन्दाकम्, अनानसम्, भेण्डः

| शाकाः | फलम् |
|---|---|
| | |

**8. श्लोकं पठित्वा पट्टिकातः उचितमाशयं चित्वा लिखत।**

सत्यं परः सदाचारः
सत्यं सर्वस्य जीवितम्।
सत्यं भगवतो रूपं
सर्वं सत्ये प्रतिष्ठितम्।।

**क)** दानं सर्वदुःखानि नाशयति।
**ख)** विद्या सर्वश्रेष्ठं द्रव्यं भवति।
**ग)** सर्वमपि कार्यं सत्ये अधिष्ठितं भवति

**9. उदाहरणानुसारं वाक्यं परिवर्तयत ।**

**उदा -** कालिदासः महाकविः आसीत् । सः उपमाप्रयोगमर्मज्ञः च आसीत्।

कालिदासः **न केवलं** महाकविः **किन्तु** उपमाप्रयोगमर्मज्ञः च आसीत्।

**क)** अब्दुल्कलां राष्ट्रपतिः आसीत्। सः शास्त्रज्ञः च आसीत्।

**10. अधोदत्तं वाक्यं पठित्वा तुमुन्नन्त-ल्यबन्त-अव्यये चित्वा लिखत।**

सृष्टेः वैभवं विज्ञाय नराः औन्नत्यं प्राप्तुं यतन्ते।

**11. प्रादेशिकभाषया विवर्तयत।** 1x5=5

प्रसिद्धः गायकः संगीतज्ञश्च भवति के. जे. येशुदास् महाशयः। सः आसामीस्, काश्मीरी, कोङ्कणी भाषाः विहाय अन्यासु सर्वासु भाषासु अगायत्। ***जानकीजाने, हरिवरासनम्, कृष्णकृपासागरम्*** इत्यादि संस्कृतगानानि अपि तेन सुमधुरम् आलपितानि। संगीतमण्डले तेन कृतं योगदानं पुरस्कृत्य २०१७ तमे वर्षे पद्मविभूषण् पुरस्कारेण समादृतः । अशीतिवयस्कः अयं महात्मा अष्टवारं देशीयचलचित्रगायकपुरस्कारम् अपि संप्राप्तवान्।



exam WiNNER®

2x4=8

12-14 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरे लिखत ।

12. **गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

**सुधर्मा**

२०१९ आगस्ट्-३०

**मैसूर्** - भारतदेशे प्रसिद्धिमापन्ना संस्कृतवार्तापत्रिका भवति सुधर्मा । १९७० वर्षाद् आरभ्य कर्णाटकराज्यस्य मैसूर् नगराद् एषा प्रकाश्यते । अस्याः प्रथमपत्राधिपः भवति वरदराज अय्यङ्कार् महोदयः। प्रतिदिनम् ३५०० प्रतिकृतयः (Copies) प्रकाश्यमानाः वर्तन्ते। आसेतुहिमाचलं संस्कृतानुरागिणः पत्रिकामेनां पठन्ति।

**क)** कस्मात् नगरात् सुधर्मा प्रकाश्यते ?
**ख)** प्रतिदिनं कति प्रतिकृतयः प्रकाश्यन्ते ?
**ग)** सुधर्मायाः प्रथमपत्राधिपः कः ?
**घ)** **दिने दिने** इत्यस्य एकपदं खण्डिकातः चित्वा लिखत ।

13. **कोष्ठकात् समुचितपदानि चित्वा सम्भाषणांशान् पूरयत।**

**(अपराधः, शोकाकुला, धन्यवादः, भूमौ)**

प्रकृतिमाता - पुत्रि! पुनरपि ............ असि। कारणं किम्?
अलाबुलता - मम फलानां भारेण ............. अपतम्।
प्रकृतिमाता - तव इच्छा तु उन्नतेः प्राप्तिः आसीत् खलु?
अलाबुलता - मातः! मम ................ क्षम्यताम्।
प्रकृतिमाता - सृष्टौ जीविनां गुणाः भिन्नाः। तेषु स्पर्धा न भवेत् । त्वं यथापूर्वं भव।
अलाबुलता - ..................।

14. **श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

दानेन भूतानि वशीभवन्ति
दानेन वैराण्यपि यान्ति नाशम्।
परोऽपि बन्धुत्वमुपैति दानै-
र्दानं हि सर्वव्यसनानि हन्ति।।

**क)** किं सर्वव्यसनानि हन्ति?
**ख)** श्लोकात् एकं क्रियापदं चित्वा लिखत।
**ग)** श्लोके **दुःखानि** इत्यर्थकं पदं किम्?
**घ)** दानेन कानि नाशं यान्ति?



exam WiNNER®

15-17 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरे लिखत । 2x4=8

15. ग्रन्थानां ग्रन्थकर्तॄणां च नामानि कोष्ठकात् स्वीकृत्य यथोचितं पट्टिकां पूरयत।

कालिदासः, पतञ्जलिः, ऊरुभङ्गम्, विशाखविजयम्।

| | ग्रन्थः | ग्रन्थकारः |
|---|---|---|
| उदाः- | महाभारतम् | व्यासः। |
| | ............................ | भासः। |
| | रघुवंशम् | ............................। |
| | ............................ | केरलवर्मा । |
| | योगसूत्रम् | ............................। |

16. सूचनाः विपुलीकृत्य जीवनचरितं लिखत।



नाम - वैलोप्पिल्लि श्रीधरमेनोन्

जन्म - 1911 मेय् 11

पितरौ - कोच्चुकुट्टन् कर्ता, नाणिक्कुट्टियम्मा।

कर्ममण्डलम् - अध्यापकः, कविः।

कृतयः - माम्पषम् , सह्यन्टे मकन्, कन्निकोय्त्, कैप्पवल्लरी।

पुरस्काराः - केन्द्रसाहित्य अक्कादमी, केरलसाहित्य अक्कादमी, वयलार्पुरस्कारः।

मृत्युः - 1985 डिसम्बर् 22

17. सूचनाः उपयुज्य लघुटिप्पणीं लिखत।

सूचनाः - रघुवंशम्- दिलीपः - अनपत्यतादुःखम् - नन्दिनीपरिचरणं
- सिंहवचनम्- विचारमूढः - भूतानुकम्पा।

*** *** *** ***



exam WiNNER®